# जैनागमेषु अयोध्यायाः वैभवम्



संस्कृतप्राकृतपालीभाषाः भारतवर्षस्य गौरवम् । आसु भारतीयजनमानसस्य मननचिन्तनानि, अनुभूतयश्च सन्निहिताः सन्ति । अत्र भारतीयसंस्कृतेः दार्शनिकचिन्तनस्य, संस्कारस्य, विज्ञानस्य, राजनीतेः, समाजनीत्यादेश्च मार्मिकी अभिव्यक्तिः भवति । वयं सर्वे जानीमः यत् वैदिकपरम्परायाः विशालं वाङ्मयं समस्तासु विधासु उपलब्धं प्रसिद्धञ्च अस्ति, किन्तु संस्कृतप्राकृतजैनसाहित्यस्य समृद्धपरम्परायाः विषये प्रायः साहित्यिकजनाः अपरिचिताः सन्ति ।

प्राचीनजैनसंस्कृतप्राकृतसाहित्ये धर्मनगर्याः अयोध्यायाः उल्लेखः असकृत् अभूत् । जैनकविः विमल-सूरिवर्यः प्राकृतभाषया 'पउमचरियम्' इति ग्रन्थं विरचय्य रामायणस्य गुप्तरहस्यस्य उद्घाटनं कृत्वा भगवतः रामस्य वीतराग्युदात्तचरित्रस्य अयोध्यायाश्च वर्णनं करोति । तत्रैव आचार्ययतिवृषभः 'तिलोयपण्णति'ग्रन्थे अयोध्यां नैकैः नामभिः सम्बोधयति । जैनसाहित्ये रामकथासम्बद्धाः नैके ग्रन्थाः निगदिताः । रविषेणकृतं 'पद्मपुराणम्' (संस्कृतेन), स्वयम्भूकृतः 'पउमचरिउ' ग्रन्थः (अपभ्रंशेन), गुणभद्रकृतम् 'उत्तरपुराणम्' (संस्कृतेन) इत्यादीनि अत्र उदाहरणानि । जैनपरम्परानुसारं भगवतः रामस्य मूलनाम 'पद्मः' इत्यपि आसीत् । अत्र ज्ञातव्यमस्ति यत् शास्त्रेषु अयोध्याम् अयुध्या, विनीतानगरी, साकेतः, सुकौशलः, रामपुरी, विशाखा इत्यादिभिः नामभिः निर्दिष्टवन्तः आचार्याः । जैनपरम्परायाम् इदमेकं शाश्वतं तीर्थं विद्यते ।

जैनपरम्परानुसारं वर्तमानकालिकेषु चतुर्दशसु तीर्थङ्करेषु पञ्चानाम् इयं जन्मभूमिः अस्ति । न हि केवलम् एतावदेव, अपि तु इयम् अनन्तानन्तानां तीर्थङ्कराणां जन्मभूमिः विद्यते, प्रत्येकचतुर्थकाले च चतुर्दश तीर्थङ्कराः प्रभुनियमेन अयोध्यायामेव जायन्ते । सम्प्रति हुण्डावसर्पिणीकालदोषात् इयं केवलं प्रथमतीर्थङ्करस्य आदिनाथस्य, द्वितीयस्य अजितनाथस्य, चतुर्थस्य अभिनन्दननाथस्य, पञ्चमस्य सुमतिनाथस्य, चतुर्दशस्य अनन्तनाथस्य चेति पञ्चानाम् एव जन्मभूमिः अस्ति ।

आचार्येण यतिवृषभेण (सा.श. १) 'तिलोयपण्णति'ग्रन्थे लिखितम् –

- ऋषभनाथः अयोध्यायां, मरुदेवीनाम्न्यां नाभिरायात् चैत्रकृष्णनवम्यां तिथौ, उत्तराषाढानक्षत्रे अजायत । – (४/५३३)
- तीर्थङ्करः अजितनाथजिनेन्द्रः साकेतनगर्यां जितशत्रुविजयाभ्यां मातापितृभ्यां माघशुक्लदशम्यां



☛ आचार्यः अनेकान्तकुमारजैनः
Email - anekant76@gmail.com

रोहिणीनक्षत्रे उत्पन्नः। – (४/५३४)

- अभिनन्दनस्वामी साकेतनगर्यां संवरसिद्धार्थाभ्यां मातापितृभ्यां माघशुक्ले द्वादश्यां पुनर्वसुनक्षत्रे उत्पन्नः। – (४/५३६)
- तीर्थङ्करः सुमतिनाथजिनेन्द्रः साकेतनगर्यां मेघसममङ्गलाभ्यां मातापितृभ्यां श्रावणशुक्ले एकादश्यां मघानक्षत्रे उत्पन्नः। – (४/५३७)
- तीर्थङ्करः अनन्तनाथजिनेन्द्रः अयोध्यापुर्यां सिंहसेनसर्वयशोभ्यां ज्येष्ठकृष्णद्वादश्यां रेवतीनक्षत्रे अवतीर्णः। – (४/५४६)

आचार्यः सङ्घदासगणिः (सा.श.३) प्राकृतभाषामये विशाले गद्यात्मके कथाग्रन्थे 'वसुदेवहिंडी' इत्यस्मिन् उल्लिखितवान् –

'इहं सुरासुरिंद-विंदवंदियमचलणारविंदो उसभो नाम पढमो राया जगप्पियामहो आसी तस्स पुत्तसयंदुवे पहाणाभरहो बाहुबली य उसभसिरी पुत्तसयस्स पुरसयं जणवयसयं च दाऊण पव्वइओ तत्थ भरहो भरहवासचूडामणी, तस्सेव नामेण इहं 'भरहवासं' ति पवुच्चति, सो विणीयाहिवती बाहुबली हत्थिणाउर तक्खसिला-सामी '



[अत्र सुरासुरवन्दिचरणारविन्दः जगत्पितामहः ऋषभनामा आदिमः राजा बभूव। तस्य शतं पुत्राः आसन्। तेषु मुख्यौद्वौ-भरतः बाहुबली च। ऋषभेण तावत् शतं पुत्रान्, शतं नगराणि जनपदान् च दत्त्वा प्रव्रजितम्। तेषु सूनुषु भरतः भारतस्य चूडामणिः आसीत्। तस्य नाम्ना एव अयं देशः भारतवर्षम् इति अभिहितः। सः विनीताधिपतिः असीत्, बाहुबली च तक्षशिलायाः स्वामी आसीत्।]

गणिनी आर्यिकाज्ञानवतीमहोदया 'महातीर्थ अयोध्या'नामके

पुस्तके लिखितवती यत् अगणिताः महापुरुषाः इमाम् अयोध्यां विभूषितवन्तः इति । आदिपुराणस्य द्वादशे पर्वणि आचार्यः जिनसेनः अयोध्यानगर्याः अतीववैभवशालि वर्णनं विस्तरेण कृतवान् । तस्याः एका छाया अस्मिन् श्लोके दरीदृश्यते –

संचस्करुश्च तां वप्रप्राकारपरिखादिभिः ।
अयोध्यां न परं नाम्ना गुणेनाप्यरिभिः सुराः ।। – (१२/७६)

[देवाः तां नगरीं वप्रात्, प्राकारात्, परिखाभिः च सुशोभितां कृतवन्तः । तस्याः नगर्याः नाम अयोध्या इति आसीत् । सा केवलेन नाममात्रेण न, अपि तु गुणेन अपि आसीद् अयोध्या । अरिभिः या जेतुं न शक्या सा भवति अयोध्या ।]

राजस्थानस्य अजमेरनगरे 'सोनी जी की नाशिया' इति विशालं जैनमन्दिरम् अस्ति । तस्मिन् मन्दिरे सिद्धकूटचैत्यालये अयोध्यानगर्याः स्वर्णरचना रचिता अस्ति, यस्याः दर्शनाय पर्यटकाः देशविदेशेभ्यः आगच्छन्ति । मन्दिरेऽमुष्मिन् तीर्थङ्करस्य १९६५ तमे वर्षे ऋषभदेवस्य प्रतिमां निर्मातुं ख्यातजैनविदुषः पण्डितस्य सदासुखदासस्य निर्देशने रायबहादुरसेठ-मूल-चन्द-नेमिचन्दसोनी इत्येतौ उद्यतौ आस्ताम् । तस्मात् कालादेव अत्र स्वर्णायोध्यायाः निर्माणम् आरब्धम् इति वदति आदिपुराणम् । १०८५ वर्षे कार्यम् इदं पूर्णतां गतम् । अस्य नाम स्वर्णम्, सोनी अथवा स्वर्णमन्दिरम् इति अभूत् ।



ये पञ्च तीर्थङ्कराः अयोध्यानगरे अजायन्त तेषां स्मरणस्वरूपेण अयोध्यातीर्थे एव तेषां मूर्तयः पदचिह्नानि च स्थापितानि वर्तन्ते । दर्शनार्थिनः तेषां प्रतिदिनं पूजनम् अभ्यर्चनां च कुर्वन्ति । साम्प्रति अयोध्यानगरे कटरास्थे दिगम्बरजैनमन्दिरे द्वितीयः तीर्थङ्करः अजितनाथः, चतुर्थः अभिनन्दननाथः, पञ्चमः सुमतिनाथः इत्येतेषां त्रयाणां स्मारकम् अस्ति ।

सरयूनद्याः तटे चतुर्दशतीर्थङ्करस्य अनन्तनाथस्य अपि मन्दिरम् (टोंक) अस्ति । अयोध्यायाम् एव बक्सरियाटोलायां मस्जिद्भवनस्य पृष्ठतः तीर्थङ्करस्य आदिनाथस्य एकं लघुमन्दिरम् अस्ति, यत्र तस्यैव 'टोंक' इति स्थापितम् अस्ति ।

पण्डितबलभद्रेण 'भारत के दिगम्बर जैनतीर्थ'पुस्तकस्य आदिमे भागे अत्र स्थितानि जैनमन्दिराणि विस्तरेण वर्णितानि । इतिहासकारैः मन्यते यत् ११९४ वर्षे मुहम्मदगोरी इत्यस्य भ्रात्रा मखदूमशाहजूसगोरर्या अयोध्या आक्रान्ता, तदानीम् अत्र स्थितं विशालमेकं मन्दिरं खण्डयित्वा तेन 'मस्जिद' निर्मितम् ।

अत्रैकं कथानकं प्रसिद्धम् अस्ति यत् कालान्तरे जैनाः मुगलशासकं नवाबफैजुद्दीनं याचितवन्तः, इदं मन्दिरम् अस्माकम् आसीत् इति । तदा तेन प्रमाणानि पृष्टानि ।

अत्र च भूमेः उत्खननात् एकं स्वस्तिकं, नारिकेलं, चतुर्मुखदीपकः च प्राप्तः । तदा तेन शासकेन

किञ्चिद् स्थानं प्रदत्तम् । जैनाः अनुमतिं प्राप्य समीपे एव एकं लघुमन्दिरं निर्माय तत्र ऋषभदेवस्य चरणचिह्नं स्थापितवन्तः । अत्रत्ये 'कटरामोहल्ला' इत्यस्मिन् अपि एकं 'टोंक' अस्ति । अत्रैव जातयोः ऋषभदेवस्य पुत्रयोः भरतबाहुबलिनोः चरणचिह्नानि स्थापितानि ।

१३३० तमवर्षं यावत् अयोध्यायाम् अनेकानि मन्दिराणि अभूवन् । कटरामन्दिरे १९५२ तमे वर्षे तीर्थङ्कराणाम् आदिनाथभरतबाहुबलिनां तिस्रः मूर्तयः प्रतिष्ठापिताः सन्ति । १९६५ तमे वर्षे रायगञ्जे रियासती-उद्याने एकं नवीनं मन्दिरं निर्मितं, यस्मिन् ३१ पादपरिमाणात्मिका तीर्थङ्करस्य ऋषभदेवस्य प्रतिमा राजते । गणिनी ज्ञानमती मातुः प्रेरणातः १९९४ तमे वर्षे इह महामस्तकाभिषेकम् आयोजितवती । त्रिचौबीसीमन्दिरं समवशरणमन्दिरं च तया नवीनतया निर्मितम् ।

२००३ तमे वर्षे अगस्तमासे २९ तमे दिनाङ्के 'टाइम्स ऑफ इण्डिया' इत्यस्मिन् वार्तापत्रे 'एएस्ऐ' - इत्यस्य एकं वृत्तं (रिपोर्ट्) प्रकाशितम् आसीत्, यत्र च उत्खननात् जैनमूर्तयः प्राप्ताः इति उल्लिखितम् । प्रधानमन्त्रिणः नरेन्द्र-मोदिमहोदयस्य, मुख्यमन्त्रिणः योगिमहोदयस्य च संयुक्तप्रयासेन अद्य अयोध्यानगरी पुनरुज्जीविता जाता । तत्रत्या प्राचीना जैनसंस्कृतिः अपि पुनः स्वगौरवं प्राप्स्यति इति आशास्महे ।



धण्णो णव अयोज्झा उसह-भरह-बाहुबली-अजिय-सुमइ ।
पवित्तो खलु जम्मभूमि अहिणंदण-अणंत-रामो य ।।

[नवीना इयम् अयोध्या धन्या अस्ति, या प्रथम-द्वितीय-चतुर्थ-पञ्चम-चतुर्दशतीर्थङ्कराणां, भगवतः रामस्य च पवित्रा जन्मभूमिः अस्ति ।]

## प्राक्रोशः किमर्थम् ?

☛ म.वि.कोल्हटकरः

कदाचित् मानवः कुप्यति तपति प्राक्रोशति च । किं कारणम् अस्य प्राक्रोशस्य ?

किं प्राक्रोशकस्य मनःशान्तिः भञ्जिता इत्यतः ? - न हि । न हि खलु ।

किं प्राक्रोशकस्य अहङ्कारः व्रणितः इत्येतत् कारणं प्राक्रोशस्य ? - न हि । न हि ।

किं प्राक्रोशकेन प्राप्तः पराभवः, अपयशः, हानिः वा सर्वथा अस्वीकार्या वर्तते इत्यतः किम् अयं प्राक्रोशः ? - कदापि न ।

प्राक्रोशकस्य कारणम् एकम् एव - एतत्प्रतिपक्षभूतः श्रोता प्राक्रोशकतः मनसः मततः विचारतः च महति दूरे विद्यते । प्राक्रोशकाय एतत् महदन्तरं दूरत्वं वा न रोचते । यदि एतद् अन्तरं न्यूनं भवेत् तर्हि प्राक्रोशकः प्राक्रोशनं न कुर्यात् । सः सौम्यैः स्वरैः कांश्चित् शब्दान् उच्चारयेत् ।

यदि अन्तरम् अत्यधिकं न स्यात् तर्हि प्राक्रोशकः मन्दस्वरेण स्वगतसदृशम् ओष्ठभावं कृत्वा स्वकथनं स्थगयेत् ।

यदि अन्तरम् अतिन्यूनतरं स्यात् तर्हि प्राक्रोशकः मन्दस्मितमात्रं कुर्यात् । तदेव अन्तरं नाममात्रेण यदि स्यात्, अथवा शून्यं स्यात् तर्हि प्राक्रोशकः अतिष्ठन् किञ्चित् विहस्य हस्ततालिकां दद्यात् ।